श्री शिव स्तोत्रं (श्रीकृष्ण कृतं)

श्री शिव स्तोत्रं (श्रीकृष्ण कृतं)

श्रीकृष्ण उवाच –
प्रणम्य देव्या गिरिशं सभक्त्या
स्वात्मन्यधात्मान मसौविचिंत्य |
नमोऽस्तु ते शाश्वत सर्वयोने
ब्रह्माधिपं त्वां मुनयो वदंति || 1 ||

त्वमेव सत्त्वं च रजस्तमश्च
त्वामेव सर्वं प्रवदंति संतः |
ततस्त्वमेवासि जगद्विधायक-
स्त्वमेव सत्यं प्रवदंति वेदाः || 2 ||

त्वं ब्रह्मा हरिरथ विश्वयोनिरग्नि-
स्संहर्ता दिनकर मंडलाधिवासः |
प्राणस्त्वं हुतवह वासवादिभेद-
स्त्वामेकं शरणमुपैमि देवमीशं || 3 ||

सांख्यास्त्वामगुणमथाहुरेकरूपं
योगस्त्वां सततमुपासते हृदिस्थं |
देवास्त्वामभिदधतीह रुद्रमग्निं
त्वामेकं शरणमुपैमि देवमीशं || 4 ||

त्वत्पादे कुसुममथापि पत्रमेकं
दत्वासौ भवति विमुक्त विश्वबंधः |
सर्वाघं प्रणुदति सिद्धयोगजुष्टं
स्मृत्वा ते पदयुगळं भवत्प्रसादात् || 5 ||

यस्या शेषविभागहीन ममलं हृद्यंतरावस्थितं
तत्त्वं ज्योतिरनंतमेकममरं सत्यं परं सर्वगं |
स्थानं प्राहुरनादिमध्यनिधनं यस्मादिदं जायते
नित्यं त्वामनुयामि सत्यविभवं विश्वेश्वरं तं शिवं || 6 ||

ॐ नमो नीलकंठाय त्रिनेत्राय च रंहसे |
महादेवाय ते नित्यमीशानाय नमो नमः || 7 ||

नमः पिनाकिने तुभ्यं नमो दंडाय मुंडिने |
नमस्ते वज्रहस्ताय दिग्वस्त्राय कपर्दिने || 8 ||

नमो भैरवनाथाय हराय च निषंगिणे |
नागयज्ञोपवीताय नमस्ते वह्नि तेजसे || 9 ||

नमोऽस्तु ते गिरीशाय स्वाहाकाराय ते नमः |
नमो मुक्ताट्टहासाय भीमाय च नमो नमः || 10 ||

नमस्ते कामनाशाय नमः कालप्रमाथिने |
नमो भैरवरूपाय कालरूपाय दंष्ट्रिणे || 11 ||

नमोऽस्तु ते त्र्यंबकाय नमस्ते कृत्तिवासने |
नमोऽंबिकाधिपतये पशूनां पतये नमः || 12 ||

नमस्ते व्योमरूपाय व्योमाधिपतये नमः |
नरनारीशरीराय सांख्य योगप्रवर्तिने || 13 ||

नमो दैवतनाथाय नमो दैवतलिंगिने |
कुमारगुरवे तुभ्यं देवदेवाय ते नमः || 14 ||

नमो यज्ञाधिपतये नमस्ते ब्रह्मचारिणे |
मृगव्याधाऽधिपतये ब्रह्माधिपतये नमः || 15 ||

नमो भवाय विश्वाय मोहनाय नमो नमः |
योगिने योगगम्याय योगमायाय ते नमः || 16 ||

नमो नमो नमस्तुभ्यं भूयो भूयो नमो नमः |
मह्यं सर्वात्मना कामान् प्रयच्छ परमेश्वर || 17 ||

एवं हि भक्त्या देवेशमभिष्टूय च माधवः |
पपात पादयोर्विप्रा देवदेवस्य दंडवत् || 18 ||

उत्थाप्य भगवान् सोमः कृष्णं केशिनिषूदनं |
बभाषे मधुरं वाक्यं मेघगंभीरनिस्स्वनं || 19 ||

इति श्रीकूर्मपुराणे श्रीकृष्णकृत शिवस्तोत्रं |